1086

॥अथाग्रयणप्रयोगः॥पत्र८॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

॥श्रीगणेशायनमः॥ अथाग्रयणं॥ ॥वर्षासुश्यामाकाग्रयणं॥ शरदिव्रीह्याग्रयणं॥ वसंतेयवाग्रयणं॥ तस्यकालः॥ रेवतीपर्वद्वयंदेवदिनंकृत्तिकादिविशाखांतेषुयस्मिन्पुष्यमात्मानुकूलंनक्षत्रंतद्देवनक्षत्रसंज्ञं॥अन्येषामपिनित्यकाम्यनैमित्तिकेष्वादीनामनुक्तेकालानामयंकालः॥ तस्याद्येप्रयोगेपूर्वेद्युर्नांदीश्राद्धंशास्त्रोदकशांतिंप्रतिसरबंधंचकृत्वापरेह्यः स्नानादिपंचकंकुर्यात्॥ अन्वारंभणीया विकृतिर्नकार्येतिवृत्तिकृत्॥आग्रयणदेवताअनुद्दिश्यपुण्याहवाचनंगार्हपत्यस्यपश्चादुपविश्ययाःपुरस्तादित्यादि स्वर्गकामआग्नेयोनयक्ष्यन्

तिस्रिरूपांशुत्रिरुच्चैरुत्काआग्रयणेनयक्ष्यमाणोन्वारंभणीययायक्ष्यन्तिसंकल्प्यान्वारंभणीययेत्यादिभ्यःसघोयायक्ष्यन्तिदेवतासंकल्पेश्यामाकाग्रयणेनयक्ष्यन्तिसंकल्प्यश्यामाकेष्टेरग्नीषोमावाज्यभागौसोम्यःपयस्याश्चरुःदेवाआज्यपाइत्यादिभ्यःसघोयायक्ष्यन्तिसंकल्प्यास्मिन्नान्वारंभणीयेश्यामाकाग्रयणादेअध्वर्युस्त्वामहृत्विगित्यध्वर्यादीन्यथाकालंवृणुयात्॥ इडादेवहूरित्यादिअग्निद्वयंविहृत्योमोस्तंत्रेप्याधानादिकुर्यादितीष्टिद्वयसन्निपातन्यायेनस्रुभबर्हिःसंभरणादिकंपृथक्दर्शपूर्णमासवत्कुर्यात्॥ संतिष्ठतेन्वारंभणीयाआत्मनेनर्पणांता॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥ ॥ नधि सज्ज तेऽत्रं ॥ ॥ पात्रासादनेस्पेनसद्रुचरुस्रुक्स्रुवौज्याहवनीयसद
अपूर्वाज्यस्रुक्स्रुवौकाले चरुमेक्षणमिति॥ ॥ ज्याग्न्याहवनीयदुपस्तापिष्टोहवनीमेक्षणे
वर्जं सादयति॥ ॥ प्रातर्हुतेग्निहोत्रेतरानीमेववापाणिसंमर्शनादिप्रणय
नेब्रह्मन्नपःप्रणेष्यामि॰ अनयापःप्रयास्यामि॰नि वीपप्रोक्षणादि यथा
दैवतं॥ ॥ यज्ञयोगानंतरंगार्हपत्येस्मात्तेवृदाज्यं संस्कृत्यस्रुचिचतुर्गृहीतं
गृहीत्वा हवनीयेसमिधमाधायाज्याहुतीर्जुहोति॥ ज्ञातायुधायज्ञातवीर्या
यज्ञातोतयेभिमातिषाहे॥ ज्ञातंयोनः ज्ञारदोऽजीतानिंद्रोनेषदतिदुरिता २

निविश्यास्वाहा॥ इंद्रायेदं॥अपरंचतुर्गृहीतंगृहीत्वा॥ येचत्वारःपथयोदेव
यानाअंतराद्यावापृथिवीवियंति॥तेषांयोअज्यानिमजीतिमावहान्नस्मैनो
देवाःपरिदत्तेहसर्वेस्वाहा॥ द्यावापृथिवीभ्यामिदं॰॥अपरं॰॥त्वा॥ग्रीष्मो
हेमंतउतनोवसंतःज्ञारदर्पाःसुवितन्नोअस्तु॥तेषामृतूनाꣳज्ञातज्ञारदा
नांनिवातएषामभयेस्यामस्वाहा॥ग्रीष्माघृतुभ्यइदं॰॥अपरं॰॥त्वा॥इ
दुवत्सरायपरिवत्सरायसंवत्सरायकृणुताबृहन्नमः॥तेषांवयꣳसुमतौय
ज्ञियानांज्योगजीताअहताःस्यामस्वाहा॥इदुवत्सरपरिवत्सरसंवत्सरे

भ्यइदं०॥अपरं०स्वा॥भद्रान्नः श्रेयः समनैष्टदेवास्त्वयावसेनसमश्नीमहित्व॥
सनोमयोभूःपितोआवि शास्वशंतोकायतनुवेस्योनःस्याहा॥देवेभ्यइदं०॥
एकमेवचतुर्गृहीतंपंचधेत्यन्ये॥पुरस्ताच्चिष्टकृतोवाज्यहोमः॥चरुस्थाल्यु
पधानकालेध्रुवयजेवहेत्येगारमावर्त्यतेषुतिरःपवित्रमानीतप्रणीतादु
ग्धांचरुस्थालीमधिश्रयति॥ध्रुवासि०ह॥तांप्रदक्षिणमंगारैःपरिचिनु
यान्निर्दग्धमिति॥तस्यांतिरःपवित्रंतंडुलानावपति॥घर्मस्तृविश्वायुषः ३
आज्यंनिरूप्याधिश्रित्योपोत्पर्यग्निकृत्यअग्नेहव्यंरक्षस्वेत्युत्काअवि द

हेतश्चपयतेतिवाचंविसृजेत्॥अग्नेऽग्नीत्करंत्प्राणानिसंस्तीर्यतेषुस्रुचःसाद
यित्वापत्न्यागार्हपत्यावेक्षणादि॥हविरुद्वासनेऽभ्याय०सासोमायजुष्टमि
धारयामि॥उद्वासयति॥घृतउस्नातिजनितामतीनामिति॥आज्येनसंतर्पयति॥
आदीध्युवनस्यगोपाइति॥अंतर्वेद्यासाद्यस्रुवमाज्यस्यपूरयित्वेत्यादि॥आ
ज्यभागाविष्टाप्रेक्षणेनपूर्वार्धाच्चरोरवद्यन्नाह॥सोमायानुब्रूहि॥सोमंय
जा॥सोमायेदं०॥सोमस्यांशुंदेवयज्यायासुरेतारंतोषिषीयेत्यनुमंत्रयते॥चि
ष्टकृतमवदायनपात्रेणहोमः॥पक्षेमधुश्चेतिचतस्रआहुतीराज्यस्थालीमा

इति तंत्र कृत्॥ चरुमेक्षणमादाय वषट्कृते कृत्वामेक्षणमनुप्रहृत्य संस्रावेणा
भिजुहोत्यो दजुःत्या ऋम्येत्यादिअन्वाहार्यमाधवासो ददाति॥ ऋत्विजएत द्वो वा
स इति॥सोमायवास इति प्रतिग्रहमंत्रः॥ ब्रह्मणेवास इतिवा॥ उज्झितिवाचनेसो
मस्याहसुज्झितिमनूज्झेषं॥ यजमानभागप्राशने॥ प्रजापतेर्विभानेतस्यरु
शेन॥अग्निःप्रथमःप्राश्नातुसहिवेदयाहविः॥ त्रिवाअस्मभ्यमोषधीःकृणो
तुविश्वचर्षणिः॥ इतिब्राह्मणतर्पणंतंसमानंतच्चप्रकृतेत्रयाणांविकृतेर्द
व्यानामितिकेचित्॥ ॥संतिष्ठतेत्र्यामाकाग्नयणं॥ ॥अथशारदिर्व्रीह्या

ग्रयणं॥ ॥स्नानादिपंचकंकृत्वायाःपुरस्तादित्यादिर्व्रीह्याग्रयणेनयक्ष्यइतित्रि
रुपांशुत्रिरुच्चैरुक्त्वाव्रीह्याग्रयणस्याग्नीषोमावाज्यभागौएंद्राग्नोद्वादशकपालः
पुरोडाशःवैश्वदेवश्चरुःद्यावापृथिव्यएककपालः०देवाः० इंद्राग्नीउच्चैःविश्वे
देवाद्यावापृथिवीइत्युपांशुनाध्वःसद्योवायक्ष्यइत्यादिदेवतासंकल्पंकुर्यात्॥
इध्मसंन्नहनेततस्त्वान्नयोविश्रितिधायथास्थितमित्यन्ये॥ पात्रासादने॥ द्वाद
शींद्राग्नार्थं॥वैश्वदेवीचरुस्थाली॥ द्यावापृथि ग्यमश्वत्रफमात्रमेककं
पालंस्फ्येनसहेति॥मेक्षणेनसहचरुमेक्षणं॥ ग्रग्निहोत्रहवणीस्रुवंदर्वीचा

दत्ते वेषायत्वेति॥नोहः प्रकृतौ द्वयोरादाने एकवचनांते नमंत्रेणादानात्॥दारु
पात्रासहैककपालोद्वासनार्थपात्रांतरं इत्यादि॥वैश्वदेवचरोः पयसिश्रपणं
पक्षे पःप्रणीयतथैव पयःप्रणयेत्॥पयःप्रणेष्यामीति॥निर्वापादिषुयथोदि
तं मूहः॥आज्यानि होमः पूर्ववत्॥अधिवपनात्पूर्वं चरुपुरोडाशीयविभागः
॥चरुस्थालात्तूष्णीमुत्तरतएककपालमुपदधाति॥ध्रुवमसि॰हा॥अंगारोधिवा
सनेभृगूणा॰स्व॥योगमंत्रेयद्दुर्म॰पृष्ठस्तदपि॰॥एवंविमोकः॥एककपालो द्वासनेपात्रांतरेस्योनंत इत्युपस्तीर्य तस्मिन्नेककपालमुद्वास्यान्वा

धायप्रभृतमाज्यमानीयआविःपृष्ठंकुर्यात्॥ऐडाग्नयागानंतरंविश्वेभ्योदेवेभ्यो हविरुत्तरार्धादवदायपूर्वार्धादवद्यत्यभिघारयति॥प्रत्यनक्ति॥अत्याक्रम्याश्राव्य प्रत्याश्राविते विश्वान्देवान्यजवषट्तेजुहोति॥विश्वेषांदेवानामहं देवयज्यया प्रीणेःसायुज्यंगमेयमित्यनुमंत्रयते॥द्यावापृथिवीभ्यामनुब्रूहिइत्यत्कापुरो डाशंसर्वंजुहुयादाधायाज्यमानीयाभिघारयति॥अत्याक्रम्याश्राव्यप्रत्या श्राविते द्यावापृथिवीयजवषट्तेस्रुचाअपर्यावर्त्तयन्त्रतिष्ठंतंजुहुयात्संस्रा वेणाभिजुहोति॥द्यावापृथिवीरहंदेवयज्ययोभयोर्लोकयोर्ऋध्यासं॥भ्रमानं

प्रतिष्ठां गमेयमितिवा॥अनुमंत्रणं॥स्विष्टकृदिडयोरेकैकपालस्याज्यादवदा
नं॥स्विष्टकृतःपूर्वंआज्यस्थाल्याःस्रुवेणजुहोति॥नभश्चस्वाहा॥नभसइ
दं०॥नभस्यश्चस्वाहा॥नभस्यायेदं०॥इषश्चस्वाहा॥इषायेदं०॥ऊर्ज्जश्चस्वाहा॥
ऊर्ज्जायेदं०॥स्विष्टकृतेमेक्षणमनुप्रहृत्यसंस्रावेणाभिजुहोति॥श्यामाका
श्रयणवदिडाप्राशनं॥सर्वत्रनवभोजनइत्युक्तत्वात्॥अन्वाहार्यमासाद्यत्र
थमञ्जंवत्संददाति॥रुद्रायगामितिप्रतिग्रहः॥ब्रह्मपोगामितिवा॥यथादैव
तमुज्झितिवाचनं॥यजमानभागप्राशनेप्रजापतेरित्येतस्यस्थानेमहेन्द्रा

LIBRARY OF THE BOMBAY BRANCH OF THE ASIATIC SOCIETY

श्रेय०० स्योनः॥आत्मनतर्पणांतंसमानं॥ ॥संतिष्ठतेत्रीह्यायणं॥
॥ ॥वसंतेयवाग्रयणं॥ ॥तस्यत्रीह्यायणोक्तादेवताश्च॥ ॥सेवसर्वैतिक
र्त्तव्यतात्रीहिशब्दस्थानेयवशब्दप्रयोगः॥स्विष्टकृतःपूर्वंआज्यस्थाल्याः
स्रुवेणाजुहोति॥सहश्चस्वाहा॥सहसइदं०॥सहस्यश्चस्वाहा॥सहस्यायेदं०॥तपश्चस्वाहा॥तपसइदं०॥तपस्यश्चस्वाहा॥तपस्यायेदं०॥यजमा
नभागप्राशने॥एतमुत्यंमधुनासंयुतंयवंसरस्वत्याअधिमनावचर्कृषुः॥इंद्रआसीत्सीरपतिःशतक्रतुःकीनाशाआसन्मरुतःसुदानवः॥ब्रा

प्रणपर्णांतंसमानं।संतिष्ठतेव्रीह्यायययणं॥ ॥ इदंवैकलिकं॥श्यामाकाय
यणस्यव्रीह्यायययणेनसहसमानतंत्रंतापक्षेव्रीह्यायययणेविशेषः॥इंद्राग्नी
विश्वेदेवाःसोमोद्यावापृथिवीइतिप्रधानदेवताःसंकल्पेइंद्राग्नीउच्चैःश्रुया
दिदेवतोउपांशुएव०णाएतादेवतासंत्रेणयक्ष्ये॥पात्रासादनेद्वितीयांस
मिक्षणांचरुस्रुचौअन्यत्ययः प्रणयनेनिर्वपेपात्रंव्रीहीन्श्यामाकांश्च
मेदेननिधायधूरसीत्यादि० व्रीक्षणंकिंशारुनिरसनेचप्रतिधान्यमावर्त्तते०
निरुप्तातिशिष्टाभिमर्शनेकीकरणमंत्राःप्रतिधान्यमावर्त्तते॥आहवनीया ७

विक्षणादितंत्रेण॥उर्वंतरिक्षमन्वितं॥अदित्यावासुपस्थेसादयामि॥अग्नेहव्यंर
क्षस्व॥अथवाव्रीक्षणाद्यपितंत्रेणमित्रस्यचक्षुषाप्रेक्षेमाभेदंमासंविजाथांमा
वांरिषं॥उरुणीवातायनिरुप्तामिमर्शनमपितथा॥इमेदेवानां॥इमेउनः
सह॥स्फात्यैवांनारात्यै॥प्रोक्षणादियथादेवतं॥उभयोर्नदे नप्रोक्षणं॥व्री
हिश्चेवहविष्कृदाद्धानं॥व्रीह्यवघातकालेश्यामाकानुपोद्यछंते।तंडुलप्रक्षाल
नंनियमांतेश्यामाकानांत्रेणोत्तरवेदेअवहंतीत्यादि॥पुनस्त्रिःफलीकरण न
प्रेषः॥भिन्नबीजत्वान्नविभागःश्यामाकानां॥इत्यादिनानाबीजतंत्रानु

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

सारेणाभिभावनीयं ॥ मुख्यक्रमेणोपहोमो ॥ यस्मिन्देवोश्यामाकादीनामन्यतमस्या
भावस्तत्रतदाश्रयणलोपः ॥ ॥ द्यावापृथिव्ययागमाज्येनैवकेचिदिच्छंति ॥ श्री
द्याश्रयणेश्यामाकप्रस्तरंवाकुर्यात् ॥ तेनसौम्याग्रयणमिदंभवति ॥ सौम्यंनिरु
प्यवाहेंद्राग्न्यादिनिर्वपः ॥ तदायजमानभागप्राज्ञेनेतदीयएवमंत्रः ॥ ॥ इत्या
श्वलायनस्यबौधायनमतमवलंब्यानुष्ठानंकुर्वतोनेतदेवविरचितोयमाश्र
यणप्रयोगः ॥ ॥ ७ ॥ ॥ ८ ॥ ॥ श्रीरस्तु ॥ ७ ॥ शुभंभवतु ॥ ॥ ८ ॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY